Click here to go back

अंगारक मंत्रः - Devanagari




## अथ अंगारक मंत्रः

ओं अस्य श्री अंगारक महामंत्रस्य विरूपाक्ष ऋषिः। गायत्री छंदः। अंगारको देवता। अं बीजं। गं शक्तिः। रं कीलकं। मम अंगारक ग्रह प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) अंगारकाय अंगुष्ठाभ्यां नमः। धरणीसुताय तर्जनीभ्यां नमः। रक्तवाससे मध्यमाभ्यां नमः। रक्तलोचनाय अनामिकाभ्यां नमः। शक्तिधराय कनिष्ठिकाभ्यां नमः। कर्मभावनाय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) अंगारकाय हृदयाय नमः। धरणीसुताय शिरसे स्वाहा। रक्तवाससे शिखायै वषट्। रक्तलोचनाय कवचाय हुं। शक्तिधराय नेत्रत्रयाय वौषट्। कर्मभावनाय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) रक्तमाल्यांबरधरं मेषारूढं चतुर्भुजं। शक्तिशूलगदापद्मं दारयंतं करांबुजैः॥ (लमित्यादि पंच पूजा) ओं लं पृथ्वितत्वात्मने गंधान्धारयामि। ओं हं आकाशतत्वात्मने पुष्पं समर्पयामि। ओं यं वायुतत्वात्मने धूपमाघ्रापयामि। ओं रं वह्नितत्वात्मने दीपन्दर्शयामि। ओं वं अमृततत्वात्मने अमृतनैवेद्यं समर्पयामि। सर्वतत्वात्मने सर्वोपचार पूजां समर्पयामि॥ अग्निर्मूर्धा दिवः ककुत्वतिः पृथिव्या अयम्। अपाग्ंसि रेताग्ंसि जिन्वति। इति अंगारक मंत्रः॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back